# aShTamUrtistotram

# અષ્ટમૂર્તિસ્તોત્રમ્

## Document Information

Text title : aShTamUrtistotram

File name : aShTamUrtistotram.itx

Category : shiva

Location : doc_shiva

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : February 20, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# અષ્ટમૂર્તિસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

ઈશા વાસ્યમિદં સર્વં ચક્ષોઃ સૂર્યો અજાયત ।
ઇતિ શ્રુતિરુવાચાતો મહાદેવઃ પરાવરઃ ॥ ૧॥

અષ્ટમૂર્તેરસૌ સૂર્યો મૂર્તિત્વં પરિકલ્પિતઃ ।
નેત્રત્રિલોચનસ્યૈકમસૌ સૂર્યસ્તદાશ્રિતઃ ॥ ૨॥

યસ્ય ભાસા સર્વમિદં વિભાતીદિ શ્રુતેરિમે ।
તમેવ ભાન્તમીશાનમનુભાન્તિ ખગાદયઃ ॥ ૩॥

ઈશાનઃ સર્વવિદ્યાનાં ભૂતાનાં ચેતિ ચ શ્રુતેઃ ।
વેદાદીનામપ્યધીશઃ સ બ્રહ્મા કૈર્ન પૂજ્યતે ॥ ૪॥

યસ્ય સંહારકાલે તુ ન કિઞ્ચિદવશિષ્યતે ।
સૃષ્ટિકાલે પુનઃ સર્વં સ એકઃ સૃજતિ પ્રભુઃ ॥ ૫॥

સૂર્યાચદ્રમસૌ ધાતા યથાપૂર્વમકલ્પયત્ ।
ઇતિ શ્રુતેર્મહાદેવઃ શ્રેષ્ઠોઽર્ચ્યઃ સકલાશ્રિતઃ ॥ ૬॥

વિશ્વં ભૂતં ભવદ્ભયં સર્વં રુદ્રાત્મકં શ્રુતમ્ ।
મૃત્યુઞ્જયસ્તારકોઽતઃ સ યજ્ઞસ્ય પ્રસાધનઃ ॥ ૭॥

વિષમાક્ષોઽપિ સમદૃક્ સશિવોઽપિ શિવઃ સ ચ ।
વૃષસંસ્થોઽપ્યતિવૃષો ગુણાત્માઽપ્યગુગુણોઽમલઃ ॥ ૮॥

યદાજ્ઞામુદ્વહન્ત્યત્ર શિરસા સાસુરાઃ સુરાઃ ।
અભ્રં વાતો વર્ષં ઇતીષવો યસ્ય સ વિશ્વપાઃ ॥ ૯॥

ભિષક્કમં ત્વા ભિષજાં શ઼ૃણોમીતિ શ્રુતેરવમ્ ।
સ્વભક્તસંસારમહારોગહર્તાઽપિ શઙ્કરઃ ॥ ૧૦॥

ઇત્યષ્ટમૂર્તિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

*aShTamUrtistotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*